# योगस्य भाषा संस्कृतं पठ्यताम्

SPF
प्रकाशनविभागः

भारतीयेषु षड्सु दर्शनेषु महर्षिणा पतञ्जलिना विरचितम् अन्यतमं **'योगदर्शनम्'** । इदं दर्शनं प्रमुखं स्थानम् आवहति । **युज-समाधौ** इति धातोः घञ्प्रत्ययेन योगः इति पदं सिद्ध्यति । अतः योगः नाम समाधिः, तन्नाम परमात्मना परमात्मनः साक्षात्कारः अर्थात् 'अन्तः विद्यमानस्य आत्मतत्त्वस्य परमात्मतत्त्वेन सह योजनम्' इति । **'योगश्चित्तवृत्तिनिरोधः' (योगदर्शनम्, समाधिपादः,२)** इति सूत्रे महर्षिः पतञ्जलिः कथयति । प्रमाणं, विपर्ययः, विकल्पः, निद्रा, स्मृतिः इति एताः पञ्च वृत्तयः सन्ति । यदा एताः वृत्तयः अभ्यासेन वैराग्येण च मनसि विलीनाः भवन्ति, यदा च मनः आत्मनः स्वरूपे दृढतया सम्मिलितं भवति तदा सा स्थितिः योगः इति कथयितुं शक्यते । एवं च शरीरम् **आद्यं खलु धर्मसाधनम्'** (कुमारसम्भवम् ;५.३३) अर्थात् अनारोग्ये जीवनम् अपूर्णं, चेतनारहितं कष्टयुक्तं च भवति । यदि अस्माकं शरीरं स्वस्थम् अस्ति तर्हि जीवनं सुखमयं परन्तु यदि शरीरम् अस्वस्थं तर्हि जीवनं दुःखमयम् एव । एते विषयाः महर्षिणा पतञ्जलिना १९७ सूत्राणि विरचितानि । एतेषां सूत्राणाम् अर्थस्य अवगमनाय **व्यासमुनिना व्यासभाष्यम्, सदाशिवेन्द्रसरस्वतिना योगसुधाकरः, भोजेन भोजवृत्तिः**, अन्यैः **वाचस्पतिमिश्रादिभिः** आचार्यैः अपि बह्व्यः व्याख्याः कृताः सन्ति । किन्तु एते ग्रन्थाः संस्कृतेन लिखिताः सन्ति । सामान्यजनानां तेषां भाषाम् अवगन्तुं कष्टकरं स्यात् । अतः योगग्रन्थानां भाषायाः अवगमनाय **योगस्य भाषा संस्कृतं पठ्यताम्** इति कश्चन पाठ्यक्रमः **संस्कृत-संवर्धन-प्रतिष्ठानेन** निर्मितः अस्ति । योगस्य भाषा इत्यनेन योगग्रन्थेषु प्रयुक्तायाः संस्कृतभाषायाः शैली इति अभिप्रायः अस्ति ।

प्रत्येकमपि शास्त्रस्य काचित् स्वकीया भाषा भवति । यथा - **गीतायाः भाषा भिन्ना, न्यायशास्त्रस्य भाषा भिन्ना, विज्ञानस्य भाषा भिन्ना, वेदान्तस्य भाषा भिन्ना, तथैव योगस्य भाषा अपि भिन्ना ।**

अस्मिन् पाठ्यक्रमे योगसूत्रेषु प्रयुक्तायाः संस्कृतभाषायाः पाठनं क्रियते । योगसूत्रेषु प्रमुखतया समासानाम्, सन्धीनाम्, कृदन्तपदानाम्, अव्ययानां च बाहुल्येन प्रयोगः दृश्यते । तेषां पाठनम् अस्मिन् पाठ्यक्रमे भवति । **अस्मिन् पाठ्यक्रमे प्रमुखतया चत्वारः भागाः सन्ति ।**

- अत्र प्रथमे भागे संस्कृतसम्भाषणाय आवश्यकानां बिन्दूनां परिचयः प्रदत्तः अस्ति । अर्थात् योगस्य शब्दाः सम्भाषणे प्रयुक्ताः सन्ति । तेषां द्वारा कथं सम्भाषणं करणीयम् इति प्रदर्शितम् अस्ति ।
- द्वितीये भागे विभक्तीनां परिचयः, हलन्तशब्दाः, विशेष्यविशेषणपरिचयः, लकाराः, कर्मणिप्रयोगः, भावेप्रयोगः प्रयोगपरिवर्तनं च इत्यादयः विषयाः प्रदर्शिताः सन्ति । एतेषाम् उपस्थापनाय योगग्रन्थेभ्यः विषयाः पदानि च स्वीकृतानि सन्ति । अत्र विभिन्नाः सम्भाषणात्मकाः पाठाः सन्ति ।
- तृतीये भागे संस्कृतव्याकरणस्य मुख्यानि तत्त्वानि बोधितानि सन्ति । यथा – सन्धिः, समासः, कारकम्, कृदन्तः, तद्धितान्तः, सन्नन्तं णिजन्तं च इत्यादीनि ।

अवधातव्यं यत् एतेषां बोधनाय योगग्रन्थेभ्यः शब्दाः एव स्वीकृताः सन्ति । कीदृशस्य सन्धेः प्रयोगः अस्ति, कीदृशस्य समासस्य प्रयोगः अस्ति इत्येवं योगसूत्रेषु अन्विष्य पाठे प्रदर्शितम् अस्ति । एतानि पुस्तकानि पठित्वा कोऽपि साक्षात् अन्येषां सदृशग्रन्थानाम् अध्ययनम् अनुवादं विना कर्तुं शक्ष्यति ।

- चतुर्थे भागे सर्वाणि योगसूत्राणि सन्ति । अत्र प्रत्येकं सूत्रस्य सन्दर्भः पदच्छेदः, अन्वयः, व्याकरणात्मकं विवरणं भावार्थः च प्रदत्तः अस्ति । व्याकरणांशे प्रत्येकस्मिन् सूत्रे विद्यमानानां सन्धिसमासयुक्तानां पदानां परिचयः प्रदत्तः अस्ति । सूत्रस्य सरलभाषया विवरणम् अस्ति । येन सूत्रस्य भावः सरलतया अवगन्तुं शक्येत ।

इत्थं योगग्रन्थेषु प्रयुक्तायाः भाषायाः आधारेण संस्कृतभाषायाः ज्ञानवर्धनाय कौशलविकासाय च तदनुगणं पाठाः सुसज्जीकृताः सन्ति । अस्मिन् पाठ्यक्रमे प्रत्येकं पाठ्यबिन्दोः उपस्थापनाय अभ्यासाय च अधिकतया योगग्रन्थेभ्यः वाक्यानि स्वीकृतानि सन्ति । अस्मिन् पाठ्यक्रमे नामाङ्कनं कर्तुम् अत्र नुदतु www.learnsamskrit.online

निश्चयेन अयं पाठ्यक्रमः योगशास्त्रम् अवगन्तुम् अत्यन्तम् उपकारकः भविष्यति इति आशास्महे ।

॥शुभं भवतु॥